

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## प्रथमकाण्डे षष्ठः प्रश्नः

### याजमानकाण्डं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

सम् त्वा। त्वा सिञ्चामि। सिञ्चामि यजुषा। यजुषा प्रजाम्। प्रजामायुः। प्रजामिति प्र—जाम्। आयुर् धनम्। धनम् च। चेति च॥ बृहस्पतिप्रसूतो यजमानः। बृहस्पतिप्रसूत इति बृहस्पति—प्रसूतः। यजमान इह। इह मा। मा रिषत्। रिषदिति रिषत्॥ आज्यमसि। असि सत्यम्। सत्यमसि। असि सत्यस्य। सत्यस्याद्ध्यक्षम्। अद्ध्यक्षमसि। अद्ध्यक्षमित्यधि—अक्षम्। असि हविः। हविरसि। असि वैश्वानरम्। वैश्वानरवैँश्वदेवम्। वैश्वदेवमुत्पूत-शुष्मम्। वैश्वदेवमिति वैश्व—देवम्। उत्पूतशुष्मꣳ सत्यौजाः। उत्पूतशुष्ममित्युत्पूत—शुष्मम्। सत्यौजाः सहः। सत्यौजा इति सत्य—ओजाः। सहोऽसि। असि सहमानम्। सहमानमसि। असि सहस्व। सहस्वारातीः। अरातीः सहस्व। सहस्वारातीयतः। अरातीयतः सहस्व। सहस्व पृतनाः। पृतनाः सहस्व। सहस्व पृतन्यतः। पृतन्यत इति पृतन्यतः॥ सहस्रवीर्यमसि। सह-स्रवीर्यमिति सहस्र—वीर्यम्। असि तत्। तन्मा। मा जिन्व। जिन्वाज्यस्य। आज्यस्याज्यम्। आज्यमसि। असि सत्यस्य। सत्यस्य सत्यम्। सत्यमसि। असि सत्यायुः। सत्यायुरसि। सत्यायुरिति सत्य—आयुः। ॥ [१] ॥ असि सत्यशुष्मम्। सत्यशुष्ममसि। सत्यशुष्ममिति सत्य—शुष्मम्। असि सत्येन। सत्येन त्वा। त्वाऽभि। अभि घारयामि। घारयामि तस्य। तस्य ते। ते भक्षीय। भक्षीय पञ्चानाम्। पञ्चानाम् त्वा। त्वा वातानाम्। वातानाय्यँन्त्राय। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि पञ्चानाम्। पञ्चानाम् त्वा। त्वर्तूनाम्। ऋतूनाय्यँ-

न्त्राय। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि पञ्चानाम्। पञ्चानाम् त्वा। त्वा दिशाम्। दिशाय्ँयन्त्राय। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि पञ्चानाम्। पञ्चानाम् त्वा। त्वा पञ्च-जनानाम्। पञ्चजनानाय्ँयन्त्राय। पञ्चजनानामिति पञ्च—जनानाम्। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि चरोः। चरोस्त्वा। त्वा पञ्चबिलस्य। पञ्चबिलस्य यन्त्राय। पञ्चबिलस्येति पञ्च—बिलस्य। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि ब्रह्मणः। ब्रह्मणस्त्वा। त्वा तेजसे। तेजसे यन्त्राय। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि क्षत्रस्य। क्षत्रस्य त्वा। त्वौजसे। ओजसे यन्त्राय। यन्त्राय धर्त्राय। ॥ [२] ॥ धर्त्राय गृह्णामि। गृह्णामि विशे। विशे त्वा। त्वा यन्त्राय। यन्त्राय धर्त्राय। धर्त्राय गृह्णामि। गृह्णामि सुवीर्याय। सुवीर्याय त्वा। सुवीर्यायेति सु—वीर्याय। त्वा गृह्णामि। गृह्णामि सुप्रजास्त्वाय। सुप्रजास्त्वाय त्वा। सुप्रजास्त्वायेति सुप्रजाः—त्वाय। त्वा गृह्णामि। गृह्णामि रायः। रायस्पोषाय। पोषाय त्वा। त्वा गृह्णामि। गृह्णामि ब्रह्मव-र्चसाय। ब्रह्मवर्चसाय त्वा। ब्रह्मवर्चसायेति ब्रह्म—वर्चसाय। त्वा गृह्णामि। गृह्णामि भूः। भूर-स्माकम्। अस्माकꣳ हविः। हविर्‌देवानाम्। देवानामाशिषः। आशिषो यजमानस्य। आशिष इत्या—शिषः। यजमानस्य देवानाम्। देवानाम् त्वा। त्वा देवताभ्यः। देवताभ्यो गृह्णामि। गृह्णामि कामाय। कामाय त्वा। त्वा गृह्णामि। गृह्णामीति गृह्णामि॥ ॥ [३] ॥

(सत्यायुरोजसे यन्त्रायत्रयस्त्रिꣳशच्च) ॥ १ ॥

---

ध्रुवोऽसि। असि ध्रुवः। ध्रुवोऽहम्। अहꣳ सजातेषु। सजातेषु भूयासम्। सजातेष्विति स—जातेषु। भूयासम् धीरः। धीरश्चेत्ता। चेत्ता वसुवित्। वसुविदुग्रः। वसुविदिति वसु—वित्। उग्रोऽसि। अस्युग्रः। उग्रोऽहम्। अहꣳ सजातेषु। सजातेषु भूयासम्। सजातेष्विति स—जातेषु। भूयासमुग्रः। उग्रश्चेत्ता। चेत्ता वसुवित्। वसुविदभिभूः। वसुविदिति वसु—वित्। अभिभूरसि। अभिभूरित्यभि—भूः। अस्यभिभूः। अभिभूरहम्। अभिभूरित्यभि—भूः। अहꣳ सजातेषु। सजातेषु भूयासम्। सजातेष्विति स—जातेषु। भूयासमभिभूः। अभिभूश्चेत्ता। अभि-भूरित्यभि—भूः। चेत्ता वसुवित्। वसुविद् युनज्मि। वसुविदिति वसु—वित्। युनज्मि त्वा। त्वा ब्रह्मणा। ब्रह्मणा दैव्येन। दैव्येन हव्याय। हव्यायास्मै। अस्मै वोढवे। वोढवे जातवेदः। जात-

वेद इति जात—वेदः॥ इन्धानास्त्वा। त्वा सुप्रजसः। सुप्रजसः सुवीराः। सुप्रजस इति सु—प्रजसः। सुवीरा ज्योक्। सुवीरा इति सु—वीराः। ज्योग् जीवेम। जीवेम बलिहृतः। बलिहृतो वयम्। बलिहृत इति बलि—हृतः। वयम् ते। त इति ते॥ यन्मे। मे अग्ने। अग्ने अस्य। अस्य यज्ञस्य। यज्ञस्य रिष्यात्। रिष्याद् यत्। ॥ [४] ॥ यद् वा। वा स्कन्दात्। स्कन्दादाज्यस्य। आज्यस्योत। उत विष्णो। विष्णो इति विष्णो॥ तेन हन्मि। हन्मि सपत्नम्। सपत्नम् दुर्मरायुम्। दुर्मरायुमा। दुर्मरायुमिति दुः—मरायुम्। ऐनम्। एनम् दधामि। दधामि निर्ऋत्याः। निर्ऋत्या उपस्थे। निर्ऋत्या इति निः—ऋत्याः। उपस्थ इत्युप—स्थे॥ भूर्भुवः। भुवः सुवः। सुवरुच्छुष्मः। उच्छुष्मो अग्ने। उच्छुष्म इत्युत्—शुष्मः। अग्ने यजमानाय। यजमानायैधि। एधि निशुष्मः। निशुष्मो अभिदासते। निशुष्म इति नि—शुष्मः। अभिदासत इत्यभि दासते॥ अग्ने देवेद्ध। देवेद्ध मन्विद्ध। देवेद्धेति देव—इद्ध। मन्विद्ध मन्द्रजिह्व। मन्विद्धेति मनु—इद्ध। मन्द्रजिह्वामर्त्यस्य। मन्द्रजिह्वेति मन्द्र—जिह्व। अमर्त्यस्य ते। ते होतः। होतर्मूर्द्धन्न्। मूर्द्धन्ना। आ जिघर्मि। जिघर्मि रायः। रायस्पोषाय। पोषाय सुप्रजास्त्वाय। सुप्रजास्त्वाय सुवीर्याय। सुप्रजास्त्वायेति सुप्रजाः—त्वाय। सुवीर्याय मनः। सुवीर्यायेति सु—वीर्याय। मनोऽसि। असि प्राजापत्यम्। प्राजापत्यम् मनसा। प्राजापत्यमिति प्राजा—पत्यम्। मनसा मा। मा भूतेन। भूतेना। आ विश। विश वाक्। वागसि। अस्यैन्द्री। ऐन्द्री सपत्नख्षयणी। सपत्नख्षयणी वाचा। सपत्नख्षयणीति सपत्न—ख्षयणी। ॥ [५] ॥ वाचा मा। मेन्द्रियेण। इन्द्रियेणा। आ विश। विश वसन्तम्। वसन्तमृतूनाम्। ऋतूनाम् प्रीणामि। प्रीणामि सः। स मा। मा प्रीतः। प्रीतः प्रीणातु। प्रीणातु ग्रीष्मम्। ग्रीष्ममृतूनाम्। ऋतूनाम् प्रीणामि। प्रीणामि सः। स मा। मा प्रीतः। प्रीतः प्रीणातु। प्रीणातु वर्षाः। वर्षा ऋतूनाम्। ऋतूनाम् प्रीणामि। प्रीणामि ताः। ता मा। मा प्रीताः। प्रीताः प्रीणन्तु। प्रीणन्तु शरदम्। शरदमृतूनाम्। ऋतूनाम् प्रीणामि। प्रीणामि सा। सा मा। मा प्रीता। प्रीता प्रीणातु। प्रीणातु हेमन्तशिशिरौ। हेमन्तशिशिरावृतूनाम्। हेमन्तशिशिराविति हेमन्त—शिशिरौ। ऋतूनाम् प्रीणामि। प्रीणामि तौ। तौ मा। मा प्रीतौ। प्रीतौ प्रीणीताम्। प्रीणीतामग्नीषोमयोः। अग्नीषोमयोरहम्। अग्नीषोमयोरित्यग्नी—सोमयोः। अहम् देवयज्यया। देवयज्यया चख्षुष्मान्। देवयज्ययेति देव—यज्यया। चख्षुष्मान् भूयासम्।

भूयासमग्नेः। अग्नेरहम्। अहम् देवयज्यया। देवयज्ययाऽन्नादः। देवयज्ययेति देव—यज्यया। अन्नादो भूयासम्। अन्नाद इत्यन्न—अदः। भूयासम् दब्धिः। ॥ [६] ॥ दब्धिरसि। अस्य-दब्धः। अदब्धो भूयासम्। भूयासममुम्। अमुम् दभेयम्। दभेयमग्नीषोमयोः। अग्नीषोमयो-रहम्। अग्नीषोमयोरित्यग्नी—सोमयोः। अहम् देवयज्यया। देवयज्यया वृत्रहा। देवयज्ययेति देव—यज्यया। वृत्रहा भूयासम्। वृत्रहेति वृत्र—हा। भूयासमिन्द्राग्नियोः। इन्द्राग्नियोरहम्। इन्द्राग्नियोरितीन्द्र—अग्नियोः। अहम् देवयज्यया। देवयज्ययेन्द्रियावी। देवयज्ययेति देव—यज्यया। इन्द्रियाव्यन्नादः। अन्नादो भूयासम्। अन्नाद इत्यन्न—अदः। भूयासमिन्द्रस्य। इन्द्र-स्याहम्। अहम् देवयज्यया। देवयज्ययेन्द्रियावी। देवयज्ययेति देव—यज्यया। इन्द्रियावी भूयासम्। भूयासम् महेन्द्रस्य। महेन्द्रस्याहम्। महेन्द्रस्येति महा—इन्द्रस्य। अहम् देवय-ज्यया। देवयज्यया जेमानम्। देवयज्ययेति देव—यज्यया। जेमानम् महिमानम्। महिमानम् गमेयम्। गमेयमग्नेः। अग्नेः स्विष्टकृतः। स्विष्टकृतोऽहम्। स्विष्टकृत इति स्विष्ट—कृतः। अहम् देवयज्यया। देवयज्यया ऽऽयुष्मान्। देवयज्ययेति देव—यज्यया। आयुष्मान्यज्ञेन। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठामिति प्रति—स्थाम्। गमेयमिति गमेयम्॥ ॥ [७] ॥

(रिष्यांथ्सपत्नस्षयण्यन्नादो भूयासꣳषड्विꣳशच्च) ॥ २ ॥

अग्निर् मा। मा दुरिष्टात्। दुरिष्टात् पातु। दुरिष्टादिति दुः—इष्टात्। पातु सविता। सविताऽघ-शꣳसात्। अघशꣳसाद् यः। अघशꣳसादित्यघ—शꣳसात्। यो मे। मेऽन्ति। अन्ति दूरे। दूरे ऽरातीयति। अरातीयति तम्। तमेतेन। एतेन जेषम्। जेषꣳ सुरूपवर्षवर्णे। सुरूपवर्षवर्ण आ। सुरूपवर्षवर्ण इति सुरूप—वर्षवर्णे। एहि। इहीमान्। इमान्भद्रान्। भद्रान्दुर्यान्। दुर्याꣳ अभि। अभ्या। एहि। इहि माम्। मामनुव्रता। अनुव्रता नि। अनुव्रतेत्यनु—व्रता। न्यु। उ शीर्षाणि। शीर्षाणि मृड्वम्। मृड्वमिडे। इड आ। एहि। इह्यदिते। अदित आ। एहि। इहि सरस्वति। सरस्वत्या। एहि। इहि रन्तिः। रन्तिरसि। असि रमतिः। रमतिरसि। असि सूनरी। सूनर्यसि। असि जुष्टे। जुष्टे जुष्टिम्। जुष्टिम् ते। तेऽशीय। अशीयोपहूते। उपहूत उपहवम्। उपहूत इत्युप—हूते। उपहवम् ते। उपहवमित्युप—हवम्। ॥ [८] ॥ तेऽशीय। अशीय सा।

सा मे॑। मे स॒त्या। स॒त्याऽऽशीः। आ॒शीर॒स्य। आ॒शीरित्या॑—शीः। अ॒स्य य॒ज्ञस्य॑। य॒ज्ञस्य॑ भूयात्। भूया॒दरे॑डता। अरे॑डता॒ मन॑सा। मन॑सा॒ तत्। तच्छ॑केयम्। श॒के॒यँय्य॒ज्ञः। य॒ज्ञो दिव॑म्। दिव॑ꣳ रोहतु। रो॒ह॒तु॒ य॒ज्ञः। य॒ज्ञो दिव॑म्। दिव॑म् गच्छतु। ग॒च्छ॒तु॒ यः। यो दे॑व॒यानः॑। दे॒व॒-यानः॒ पन्था॑ः। दे॒व॒यान॒ इति॑ देव—यानः॑। पन्था॒स्तेन॑। तेन॑ य॒ज्ञः। य॒ज्ञो दे॒वान्। दे॒वाꣳ अपि॑। अप्ये॑तु। ए॒त्व॒स्मासु॑। अ॒स्मास्विन्द्रः॑। इन्द्र॑ इन्द्रि॒यम्। इ॒न्द्रि॒यम् द॑धातु। द॒धा॒त्व॒स्मान्। अ॒स्मान् राय॑ः। राय॑ उ॒त। उ॒त य॒ज्ञाः। य॒ज्ञाः स॑चन्ताम्। स॒च॒न्ता॒म॒स्मासु॑। अ॒स्मासु॑ सन्तु। स॒न्त्वा॒-शिष॑ः। आ॒शिषः॒ सा। आ॒शिष॒ इत्या॑—शिष॑ः। सा न॑ः। नः॒ प्रि॒या। प्रि॒या सु॒प्रतू॑र्तिः। सु॒प्र-तू॑र्तिर्-म॒घोनी॑। सु॒प्रतू॑र्ति॒रिति॑ सु—प्रतू॑र्तिः। म॒घोनी॒ जुष्टि॑ः। जुष्टि॑रसि। अ॒सि॒ जु॒षस्व॑। जु॒षस्व॑ नः। नो॒ जुष्टा॑। जुष्टा॑ नः। नो॒ऽसि॒। ॥ [९] ॥ अ॒सि॒ जुष्टि॑म्। जुष्टि॑म् ते। ते॒ ग॒मे॒य॒म्। ग॒मे॒य॒म् मन॑ः। मनो॒ ज्योति॑ः। ज्योति॑र्-जुषताम्। जु॒ष॒ता॒माज्य॑म्। आज्य॒व्विँच्छि॑न्नम्। विच्छि॑न्नँय्य॒ज्ञम्। विच्छि॑न्न॒मिति॒ वि—छि॒न्न॒म्। य॒ज्ञꣳ सम्। समि॒मम्। इ॒मम् द॑धातु। द॒धा॒त्विति॑ दधातु॥ बृह॒-स्पति॑स्तनुताम्। त॒नु॒ता॒मि॒मम्। इ॒मम् न॑ः। नो॒ विश्वे॑। विश्वे॑ दे॒वाः। दे॒वा इ॒ह। इ॒ह मा॑द-यन्ताम्। मा॒द॒य॒न्ता॒मिति॑ मा॑दयन्ताम्॥ ब्र॒द्ध्न पिन्व॑स्व। पिन्व॑स्व॒ दद॑तः। दद॑तो मे। मे॒ मा। मा क्षा॑यि। क्षा॒यि॒ कु॒र्व॑तः। कु॒र्व॑तो मे॑। मे॒ मा। मोप॑। उप॑ दसत्। द॒स॒त्-प्र॒जाप॑तेः। प्र॒जा-प॑तेर्-भा॒गः। प्र॒जाप॑ते॒रिति॑ प्र॒जा—प॒तेः॒। भा॒गो॑ऽसि। अ॒स्यू॒र्जस्वा॑न्। ऊ॒र्जस्वा॒न् पय॑स्वान्। पय॑स्वान् प्राणापा॒नौ। प्रा॒णा॒पा॒नौ मे॑। प्रा॒णा॒पा॒नावि॒ति॑ प्राण—अ॒पा॒नौ। मे॒ पा॒हि॒। पा॒हि॒ स॒मा॒न-व्या॒नौ। स॒मा॒न॒व्या॒नौ मे॑। स॒मा॒न॒व्या॒नावि॒ति॑ समान—व्या॒नौ। मे॒ पा॒हि॒। पा॒ह्यु॒दा॒न॒व्या॒नौ। उ॒दा॒-न॒व्या॒नौ मे॑। उ॒दा॒न॒व्या॒नावि॒त्यु॑दान—व्या॒नौ। मे॒ पा॒हि॒। पा॒ह्यक्षि॑तः। अक्षि॑तोऽसि। अ॒स्य-क्षि॑त्यै। अक्षि॑त्यै त्वा। त्वा॒ मा। मा मे॑। मे॒ क्षे॒ष्ठाः। क्षे॒ष्ठा अ॒मुत्र॑। अ॒मु॒त्रा॒मु॒ष्मि॑न्न्। अ॒मु-ष्मि॑ल्ँलो॒के। लो॒क इति॑ लो॒के॥ ॥ [१०] ॥

(उ॒प॒ह॒वंजुष्टा॑नस्त्वा॒ षट्च॑) ॥ ३ ॥

ब॒र्॒हि॒षो॒ऽहम्। अ॒हम् दे॑व॒यज्य॑या। दे॒व॒य॒ज्य॑या प्र॒जावा॑न्। दे॒व॒य॒ज्य॒येति॑ देव—य॒ज्य॑या। प्र॒जावा॑न्-भूयासम्। प्र॒जावा॒निति॑ प्र॒जा—वा॒न्। भू॒या॒स॒म् न॒रा॒शꣳस॑स्य। न॒रा॒शꣳस॒स्या॒हम्।

अहम् देवयज्ययां। देवयज्यया पशुमान्। देवयज्ययेति देव—यज्ययां। पशुमान् भूयासम्। पशुमानिति पशु—मान्। भूयासमग्नेः। अग्नेः स्विष्टकृतः। स्विष्टकृतोऽहम्। स्विष्टकृत इति स्विष्ट—कृतः। अहम् देवयज्ययां। देवयज्यया ऽऽयुष्मान्। देवयज्ययेति देव—यज्ययां। आयुष्मान्यज्ञेन। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठामिति प्रति—स्थाम्। गमेय-मग्नेः। अग्नेरहम्। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषꣳ सोमस्य। सोमस्याहम्। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषमग्नेः। अग्नेरहम्। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषमग्नीषोमयोः। अग्नीषोमयोरहम्। अग्नीषोमयोरित्यग्नी—सोमयोः। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेष-मिन्द्राग्नियोः। इन्द्राग्नियोरहम्। इन्द्राग्नियोरितीन्द्र—अग्नियोः। अहमुज्जितिम्। उज्जिति-मनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषमिन्द्रस्य। इन्द्रस्याहम्। अहमु-ज्जितिम्। ॥ [११] ॥ उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषम् महेन्द्रस्य। महेन्द्रस्याहम्। महेन्द्रस्येति महा—इन्द्रस्य। अहमुज्जितिम्। उज्जितिमनु। उज्जि-तिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषमग्नेः। अग्नेः स्विष्टकृतः। स्विष्टकृतोऽहम्। स्विष्ट-कृत इति स्विष्ट—कृतः। अहमुज्जितिम्। उज्जितिमनु। उज्जितिमित्युत्—जितिम्। अनूत्। उज्जेषम्। जेषँव्वाजस्य। वाजस्य मा। मा प्रसवेन। प्रसवेनोद्ग्राभेण। प्रसवेनेति प्र—सवेन। उद्ग्राभेणोत्। उद्ग्राभेणेत्युत्—ग्राभेण। उदग्रभीत्। अग्रभीदित्यग्रभीत्॥ अथा सपत्नान्। सपत्नाꣳ इन्द्रः। इन्द्रो मे। मे निग्राभेण। निग्राभेणाधरान्। निग्राभेणेति नि—ग्राभेण। अधराꣳ अकः। अकरित्यकः॥ उद्ग्राभम् च। उद्ग्राभमित्युत्—ग्राभम्। च निग्राभम्। निग्राभम् च। निग्राभमिति नि—ग्राभम्। च ब्रह्म। ब्रह्म देवाः। देवा अवीवृधन्न्। अवीवृधन्नित्यवीवृधन्न्॥ अथा सपत्नान्। सपत्नानिन्द्राग्नी। इन्द्राग्नी मे। इन्द्राग्नी इतीन्द्र—अग्नी। मे विषूचीनान्। विषूचीनान्वि। व्यस्यताम्। अस्यतामित्यस्यताम्॥ एमाः। इमा अग्मन्न्। अग्मन्नाशिषः। आशिषो दोहकामाः। आशिष इत्या—शिषः। दोहकामा इन्द्रवन्तः। दोहकामा इति दोह—कामाः। इन्द्रवन्तो वनामहे। इन्द्रवन्त इतीन्द्र—वन्तः। ॥ [१२] ॥ वनामहे धुक्षीमहि।

धुक्षीमहि प्रजाम्। प्रजामिषम्। प्रजामिति प्र—जाम्। इषमितीषम्॥ रोहितेन त्वा। त्वाऽग्निः। अग्निर् देवताम्। देवताम् गमयतु। गमयतु हरिभ्याम्। हरिभ्याम् त्वा। हरिभ्यामिति हरि—भ्याम्। त्वेन्द्रः। इन्द्रो देवताम्। देवताम् गमयतु। गमयत्वेतशेन। एतशेन त्वा। त्वा सूर्यः। सूर्यो देवताम्। देवताम् गमयतु। गमयतु वि। वि ते। ते मुञ्चामि। मुञ्चामि रशनाः। रशना वि। वि रश्मीन्। रश्मीन्वि। वि योक्त्रा। योक्त्रा यानि। यानि परिचर्तनानि। परिचर्तनानि धत्तात्। परिचर्तनानीति परि—चर्तनानि। धत्तादस्मासु। अस्मासु द्रविणम्। द्रविणय्यँत्। यच्च। च भद्रम्। भद्रम् प्र। प्र णः। नो ब्रूतात्। ब्रूताद् भागधान्। भागधान् देवतासु। भागधानिति भाग—धान्। देवतास्विति देवतासु॥ विष्णोः शय्यँोः। शय्यँोरहम्। शय्यँोरिति शम्—योः। अहम् देवयज्यया। देवयज्यया यज्ञेन। देवयज्ययेति देव—यज्यया। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठामिति प्रति—स्थाम्। गमेयꣳ सोमस्य। सोमस्याहम्। अहम् देवयज्यया। देवयज्यया सुरेताः। देवयज्ययेति देव—यज्यया। ॥ [१३] ॥ सुरेता रेतः। सुरेता इति सु—रेताः। रेतो धिषीय। धीषीय त्वष्टुः। त्वष्टुरहम्। अहम् देवयज्यया। देवयज्यया पशूनाम्। देवयज्ययेति देव—यज्यया। पशूनाꣳ रूपम्। रूपम् पुषेयम्। पुषेयम् देवानाम्। देवानाम् पत्नीः। पत्नीरग्निः। अग्निर्गृहपतिः। गृहपतिर्यज्ञस्य। गृहपतिरिति गृह—पतिः। यज्ञस्य मिथुनम्। मिथुनम् तयोः। तयोरहम्। अहम् देवयज्यया। देवयज्यया मिथुनेन। देवयज्ययेति देव—यज्यया। मिथुनेन प्र। प्र भूयासम्। भूयासव्वँदः। वेदोऽसि। असि वित्तिः। वित्तिरसि। असि विदेय। विदेय कर्म। कर्मासि। असि करुणम्। करुणमसि। असि क्रियासम्। क्रियासꣳ सनिः। सनिरसि। असि सनिता। सनिताऽसि। असि सनेयम्। सनेयम् घृतवन्तम्। घृतवन्तम् कुलायिनम्। घृतवन्तमिति घृत—वन्तम्। कुलायिनꣳ रायः। रायस्पोषम्। पोषꣳ सहस्रिणम्। सहस्रिणव्वँदः। वेदो ददातु। ददातु वाजिनम्। वाजिनमिति वाजिनम्॥ ॥ [१४] ॥

(इन्द्रस्याहमिन्द्रवन्तःसोमस्याहं देवयज्ययाचतुश्चत्वारिꣳशच्च) ॥ ४ ॥

आ प्यायताम्। प्यायताम् ध्रुवा। ध्रुवा घृतेन। घृतेन यज्ञय्यँज्ञम्। यज्ञय्यँज्ञं प्रति। यज्ञ-य्यँज्ञमिति यज्ञं—यज्ञम्। प्रति देवयद्भ्यः। देवयद्भ्य इति देवयत्—भ्यः॥ सूर्याया ऊधः।

ऊधोऽदित्याः। अदित्या उपस्थे। उपस्थ उरुधारा। उपस्थ इत्युप—स्थे। उरुधारा पृथिवी। उरुधारेत्युरु—धारा। पृथिवी यज्ञे। यज्ञे अस्मिन्न्। अस्मिन्नित्यस्मिन्न्॥ प्रजापतेर्,विभान्। प्रजापतेरिति प्रजा—पतेः। विभान्नाम। विभानिति वि—भान्। नाम लोकः। लोकस्तस्मिन्न्। तस्मिꣳ स्त्वा। त्वा दधामि। दधामि सह। सह यजमानेन। यजमानेन सत्। सदसि। असि सत्। सन्मे। मे भूयाः। भूयाः सर्वम्। सर्वमसि। असि सर्वम्। सर्वम् मे। मे भूयाः। भूयाः पूर्णम्। पूर्णमसि। असि पूर्णम्। पूर्णम् मे। मे भूयाः। भूया अख्षितम्। अख्षितमसि। असि मा। मा मे। मे ख्षेष्ठाः। ख्षेष्ठाः प्राच्याम्। प्राच्याम् दिशि। दिशि देवाः। देवा ऋत्विजः। ऋत्विजो मार्जयन्ताम्। मार्जयन्ताम् दख्षिणायाम्। दख्षिणायाम् दिशि। ॥ [१५] ॥ दिशि मासाः। मासाः पितरः। पितरो मार्जयन्ताम्। मार्जयन्ताम् प्रतीच्याम्। प्रतीच्याम् दिशि। दिशि गृहाः। गृहाः पशवः। पशवो मार्जयन्ताम्। मार्जयन्तामुदीच्याम्। उदीच्याम् दिशि। दिश्यापः। आप ओषधयः। ओषधयो वनस्पतयः। वनस्पतयो मार्जयन्ताम्। मार्जयन्तामू-द्र्ध्वायाम्। ऊद्र्ध्वायाम् दिशि। दिशि यज्ञः। यज्ञः सँव्वथ्सरः। सँव्वथ्सरो यज्ञपतिः। सँव्व-थ्सर इति सम्—वथ्सरः। यज्ञपतिर्,मार्जयन्ताम्। यज्ञपतिरिति यज्ञ—पतिः। मार्जयन्ता-ँव्विष्णोः। विष्णोः क्रमः। क्रमोऽसि। अस्यभिमातिहा। अभिमातिहा गायत्रेण। अभिमाति-हेत्यभिमाति—हा। गायत्रेण छन्दसा। छन्दसा पृथिवीम्। पृथिवीमनु। अनु वि। वि क्रमे। क्रमे निर्भक्तः। निर्भक्तः सः। निर्भक्त इति निः—भक्तः। स यम्। यम् द्विष्मः। द्विष्मो विष्णोः। विष्णोः क्रमः। क्रमोऽसि। अस्यभिशस्तिहा। अभिशस्तिहा त्रैष्टुभेन। अभिशस्तिहेत्यभि-शस्ति—हा। त्रैष्टुभेन छन्दसा। छन्दसाऽन्तरिख्षम्। अन्तरिख्षमनु। अनु वि। वि क्रमे। क्रमे निर्भक्तः। निर्भक्तः सः। निर्भक्त इति निः—भक्तः। स यम्। यम् द्विष्मः। द्विष्मो विष्णोः। विष्णोः क्रमः। क्रमोऽसि। अस्यरातीयतः। अरातीयतो हन्ता। हन्ता जागतेन। जागतेन छन्दसा। छन्दसा दिवम्। दिवमनु। अनु वि। विक्रमे। क्रमे निर्भक्तः। निर्भक्तः सः। निर्भक्त इति निः—भक्तः। स यम्। यम् द्विष्मः। द्विष्मो विष्णोः। विष्णोः क्रमः। क्रमोऽसि। असि शत्रूयतः। शत्रूयतो हन्ता। शत्रूयत इति शत्रु—यतः। हन्ताऽऽनुष्टुभेन। आनुष्टुभेन छन्दसा। आनुष्टुभेने-

त्यानु—स्तुभेन। छन्दसा दिशः। दिशोऽनु। अनु वि। वि क्रमे। क्रमे निर्भक्तः। निर्भक्तः सः। निर्भक्त इति निः—भक्तः। स यम्। यम् द्विष्मः। द्विष्म इति द्विष्मः॥ ॥ [१६] ॥

(दक्षिणाया मन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णो रेकान्न त्रिꣳशाच्च) ॥ ५ ॥

अगन्म सुवः। सुवः सुवः। सुवरगन्म। अगन्म सन्दृशः। सन्दृशस्ते। सन्दृश इति सम्—दृशः। ते मा। मा छिथ्सि। छिथ्सि यत्। यत्ते। ते तपः। तपस्तस्मै। तस्मै ते। ते मा। मा ऽऽवृक्षि। आ वृक्षि। वृक्षि सुभूः। सुभूरसि। सुभूरिति सु—भूः। असि श्रेष्ठः। श्रेष्ठो रश्मीनाम्। रश्मीनामायुर्द्धाः। आयुर्द्धा असि। आयुर्द्धा इत्यायुः—धाः। अस्यायुः। आयुर्मे। मे धेहि। धेहि वर्चोधाः। वर्चोधा असि। वर्चोधा इति वर्चः—धाः। असि वर्चः। वर्चो मयि। मयि धेहि। धेहीदम्। इदमहम्। अहममुम्। अमुम् भ्रातृव्यम्। भ्रातृव्यमाभ्यः। आभ्यो दिग्भ्यः। दिग्भ्योऽस्यै। दिग्भ्य इति दिक्—भ्यः। अस्यै दिवः। दिवोऽस्मात्। अस्मादन्तरिक्षात्। अन्तरिक्षादस्यै। अस्यै पृथिव्याः। पृथिव्या अस्मात्। अस्मादन्नाद्यात्। अन्नाद्यान्निः। अन्नाद्यादित्यन्न—अद्यात्। निर् भजामि। भजामि निर्भक्तः। निर्भक्तः सः। निर्भक्त इति निः—भक्तः। स यम्। यम् द्विष्मः। द्विष्म इति द्विष्मः॥ ॥ [१७] ॥ सम् ज्योतिषा। ज्योतिषा ऽभूवम्। अभूवमैन्द्रीम्। ऐन्द्रीमावृतम्। आवृतमन्वावर्ते। आवृतमित्या—वृतम्। अन्वावर्ते सम्। अन्वावर्त इत्यनु—आवर्ते। समहम्। अहम् प्रजया। प्रजया सम्। प्रजयेति प्र—जया। सम् मया। मया प्रजा। प्रजा सम्। प्रजेति प्र—जा। समहम्। अहꣳ रायः। रायस्पोषेण। पोषेण सम्। सम् मया। मया रायः। रायस्पोषः। पोषः समिद्धः। समिद्धो अग्ने। समिद्ध इति सम्—इद्धः। अग्ने मे। मे दीदिहि। दीदिहि समेद्धा। समेद्धा ते। समेद्धेति सम्—एद्धा। ते अग्ने। अग्ने दीद्यासम्। दीद्यासँव्वसुमान्। वसुमान्यज्ञः। वसुमानिति वसु—मान्। यज्ञो वसीयान्। वसीयान् भूयासम्। भूयासमग्ने। अग्न आयूꣳषि। आयूꣳषि पवसे। पवस आ। आ सुव। सुवोर्जम्। ऊर्जमिषम्। इषम् च। च नः। न इति नः॥ आरे बाधस्व। बाधस्व दुच्छुनाम्। दुच्छुनामिति दुच्छुनाम्॥ अग्ने पवस्व। पवस्व स्वपाः। स्वपा अस्मे। स्वपा इति सु—अपाः। अस्मे वर्चः। अस्मे इत्यस्मे। वर्चः सुवीर्यम्। सुवीर्यमिति सु—वीर्यम्॥ ॥ [१८] ॥ दधत्पोषम्।

पोषꣳ रयिम्। रयिम् मयि। मयीति मयि॥ अग्ने गृहपते। गृहपते सुगृहपतिः। गृहपत इति गृह—पते। सुगृहपतिरहम्। सुगृहपतिरिति सु—गृहपतिः। अहम् त्वया। त्वया गृहपतिना। गृहपतिना भूयासम्। गृहपतिनेति गृह—पतिना। भूयासꣳ सुगृहपतिः। सुगृहपतिर्मया। सुगृहपतिरिति सु—गृहपतिः। मया त्वम्। त्वम् गृहपतिना। गृहपतिना भूयाः। गृहपतिनेति गृह—पतिना। भूयाः शतम्। शतꣳ हिमाः। हिमास्ताम्। तामाशिषम्। आशिषमा। आशिषमित्या—शिषम्। आ शासे। शासे तन्तवे। तन्तवे ज्योतिष्मतीम्। ज्योतिष्मतीम् ताम्। तामाशिषम्। आशिषमा। आशिषमित्या—शिषम्। आ शासे। शासेऽमुष्मै। अमुष्मै ज्योतिष्मतीम्। ज्योतिष्मतीम् कः। कस्त्वा। त्वा युनक्ति। युनक्ति सः। स त्वा। त्वा वि। वि मुञ्चतु। मुञ्चत्वग्ने। अग्ने व्रतपते। व्रतपते व्रतम्। व्रतपत इति व्रत—पते। व्रतमचारिषम्। अचारिषम् तत्। तदशकम्। अशकम् तत्। तन्मे। मेऽराधि। अराधि यज्ञः। यज्ञो बभूव। बभूव सः। स आ। आ बभूव। ॥ [१९] ॥ बभूव सः। स प्र। प्र जज्ञे। जज्ञे सः। स वावृधे। वावृध इति वावृधे॥ स देवानाम्। देवानामधिपतिः। अधिपतिर्बभूव। अधिपतिरित्यधि—पतिः। बभूव सः। सो अस्मान्। अस्माꣳ अधिपतीन्। अधिपतीन् करोतु। अधिपतीनित्यधि—पतीन्। करोतु वयम्। वयꣳ स्याम। स्याम पतयः। पतयो रयीणाम्। रयीणामिति रयीणाम्॥ गोमाꣳ अग्ने। गोमानिति गो—मान्। अग्नेऽविमान्। अविमाꣳ अश्वी। अविमानित्यवि—मान्। अश्वी यज्ञः। यज्ञो नृवथ्सखा। नृवथ्सखा सदम्। नृवथ्सखेति नृवत्—सखा। सदमित्। इदप्रमृष्यः। अप्रमृष्य इत्यप्र—मृष्यः॥ इडावाꣳ एषः। इडावानितीडा—वान्। एषो असुर। असुर प्रजावान्। प्रजावान् दीर्घः। प्रजावानिति प्रजा—वान्। दीर्घो रयिः। रयिः पृथुबुद्ध्नः। पृथुबुद्ध्नः सभावान्। पृथुबुद्ध्न इति पृथु—बुद्ध्नः। सभावानिति सभा—वान्॥ ॥ [२०] ॥

(द्विष्मःसुवीर्यꣳस आपश्चत्रिꣳशच्च) ॥ ६ ॥

यथा वै। वै समृतसोमाः। समृतसोमा एवम्। समृतसोमा इति समृत—सोमाः। एवँवै। वा एते। एते समृतयज्ञाः। समृतयज्ञा यत्। समृतयज्ञा इति समृत—यज्ञाः। यद् दर्शपूर्णमासौ। दर्शपूर्णमासौ कस्य। दर्शपूर्णमासाविति दर्श—पूर्णमासौ। कस्य वा। वाऽहं। अहं

देवाः। देवा यज्ञम्। यज्ञमागच्छन्ति। आगच्छन्ति कस्य। आगच्छन्तीत्या—गच्छन्ति। कस्य वा। वा न। न बहूनाम्। बहूनाय्ँयजमानानाम्। यजमानानाय्ँयः। यो वै। वै देवताः। देवताः पूर्वः। पूर्वः परिगृह्णाति। परिगृह्णाति सः। परिगृह्णातीति परि—गृह्णाति॥ स एनाः। एनाः श्वः। श्वो भूते। भूते यजते। यजत एतत्। एतद् वै। वै देवानाम्। देवानामायतनम्। आय-तनय्ँयत्। आयतनमित्या—यतनम्। यदाहवनीयः। आहवनीयोन्तरा। आहवनीय इत्या—हवनीयः। अन्तराऽग्नी। अग्नी पशूनाम्। अग्नी इत्यग्नी। पशूनाम् गार्हपत्यः। गार्हपत्यो मनुष्याणाम्। गार्हपत्य इति गार्ह—पत्यः। मनुष्याणामन्वाहार्यपचनः। अन्वाहार्यपचनः पितृणाम्। अन्वाहार्यपचन इत्यन्वाहार्य—पचनः। पितृणामग्निम्। अग्निम् गृह्णाति। गृह्णाति स्वे। स्व एव। एवायतने। आयतने देवताः। आयतन इत्या—यतने। देवताः परि। परि गृह्णाति। ॥ [२१] ॥ गृह्णाति ताः। ताः श्वः। श्वो भूते। भूते यजते। यजते व्रतेन। व्रतेन वै। वै मेद्ध्यः। मेद्ध्योऽग्निः। अग्निर् व्रतपतिः। व्रतपतिर्,ब्राह्मणः। व्रतपतिरिति व्रत—पतिः। ब्राह्मणो व्रतभृत्। व्रतभृद् व्रतम्। व्रतभृदिति व्रत—भृत्। व्रतमुपैष्यन्न्। उपैष्यन्,ब्रूयात्। उपै-ष्यन्नित्युप—एष्यन्न्। ब्रूयादग्ने। अग्ने व्रतपते। व्रतपते व्रतम्। व्रतपत इति व्रत—पते। व्रतम् चरिष्यामि। चरिष्यामीति। इत्यग्निः। अग्निर् वै। वै देवानाम्। देवानाव्ँव्रतपतिः। व्रतपति-स्तस्मै। व्रतपतिरिति व्रत—पतिः। तस्मा एव। एव प्रतिप्रोच्य। प्रतिप्रोच्य व्रतम्। प्रतिप्रोच्येति प्रति—प्रोच्य। व्रत मा। आ लभते। लभते बर्हिषा। बर्हिषा पूर्णमासे। पूर्णमासे व्रतम्। पूर्णमास इति पूर्ण—मासे। व्रतमुप। उपैति। एति वथ्सैः। वथ्सैरमावास्यायाम्। अमावास्या-यामेतत्। अमावास्यायामित्यमा—वास्यायाम्। एतद्धि। ह्येतयोः। एतयोरायतनम्। आयत-नमुपस्तीर्यः। आयतनमित्या—यतनम्। उपस्तीर्यः पूर्वः। उपस्तीर्य इत्युप—स्तीर्यः। पूर्वश्च। चाग्निः। अग्निरपरः। अपरश्च। चेति। इत्याहुः। आहुर्,मनुष्याः। मनुष्या इत्। ॥ [२२] ॥ इन्नु। न्वै। वा उपस्तीर्णम्। उपस्तीर्णमिच्छन्ति। उपस्तीर्णमित्युप—स्तीर्णम्। इच्छन्ति किम्। किमु। उ देवाः। देवा येषाम्। येषाम् नवावसानम्। नवावसानमुप। नवावसानमितिनव—अवसानम्। उपास्मिन्न्। अस्मिञ्छ्वः। श्वो यक्ष्यमाणे। यक्ष्यमाणे देवताः। देवता वसन्ति। वसन्ति यः। य एवम्। एवव्ँविद्वान्। विद्वानग्निम्। अग्निमुपस्तृणाति। उपस्तृणाति यजमा-

नेन। उपस्तृणातीत्युप—स्तृणाति। यजमानेन ग्राम्याः। ग्राम्याश्च। च पशवः। पशवोऽव-रुद्ध्याः। अवरुद्ध्या आरण्याः। अवरुद्ध्या इत्यव—रुद्ध्याः। आरण्याश्च। चेति। इत्याहुः। आहुर् यत्। यद् ग्राम्यान्। ग्राम्यानुपवसति। उपवसति तेन। उपवसतीत्युप—वसति। तेन ग्राम्यान्। ग्राम्यानव। अव रुन्धे। रुन्धे यत्। यदारण्यस्य। आरण्यस्याश्ञाति। अश्ञाति तेन। तेनारण्यान्। आरण्यान्यत्। यदनाश्वान्। अनाश्वानुपवसेत्। उपवसेत् पितृदेवत्यः। उपवसेदित्युप—वसेत्। पितृदेवत्यः स्यात्। पितृदेवत्य इति पितृ—देवत्यः। स्यादारण्यस्य। आरण्यस्याश्ञाति। अश्ञातीन्द्रियम्। इन्द्रियव्वै। ॥ [२३] ॥ वा आरण्यम्। आरण्य-मिन्द्रियम्। इन्द्रियमेव। एवात्मन्न्। आत्मन् धत्ते। धत्ते यत्। यदनाश्वान्। अनाश्वानुप-वसेत्। उपवसेत्,क्षोधुकः। उपवसेदित्युप—वसेत्। क्षोधुकः स्यात्। स्याद् यत्। यद-श्ञीयात्। अश्ञीयाद् रुद्रः। रुद्रोऽस्य। अस्य पशून्। पशूनभि। अभि मन्येत। मन्येतापः। अपोऽश्ञाति। अश्ञाति तत्। तन्न। नेव। इवाशितम्। अशितम् न। नेव। इवानशितम्। अनशितम् न। न क्षोधुकः। क्षोधुको भवति। भवति न। नास्य। अस्य रुद्रः। रुद्रः पशून्। पशूनभि। अभि मन्यते। मन्यते वज्रः। वज्रो वै। वै यज्ञः। यज्ञः क्षुत्। क्षुत् खलु। खलु वै। वै मनुष्यस्य। मनुष्यस्य भ्रातृव्यः। भ्रातृव्यो यत्। यदनाश्वान्। अनाश्वानुपवसति। उपवसति वज्रेण। उपवसतीत्युप—वसति। वज्रेणैव। एव साक्षात्। साक्षात्,क्षुधम्। साक्षादिति स—अक्षात्। क्षुधम् भ्रातृव्यम्। भ्रातृव्यꣳ हन्ति। हन्तीति हन्ति॥ ॥ [२४] ॥

(परिमनुष्याइन्द्रियसाक्षात्त्रीणि च) ॥ ७ ॥

---

यो वै। वै श्रद्धाम्। श्रद्धामनारभ्य। श्रद्धामिति श्रत्—धाम्। अनारभ्य यज्ञेन। अनार-भ्येत्यना—रभ्य। यज्ञेन यजते। यजते न। नास्य। अस्येष्टाय। इष्टाय श्रत्। श्रद् दधते। दध-तेऽपः। अपः प्र। प्र णयति। नयति श्रद्धा। श्रद्धा वै। श्रद्धेति श्रत्—धा। वा आपः। आपः श्रद्धाम्। श्रद्धामेव। श्रद्धामिति श्रत्—धाम्। एवारभ्य। आरभ्य यज्ञेन। आरभ्येत्या—रभ्य। यज्ञेन यजते। यजत उभये। उभयेऽस्य। अस्य देवमनुष्याः। देवमनुष्या इष्टाय। देवमनुष्या इति देव—मनुष्याः। इष्टाय श्रत्। श्रद् दधते। दधते तत्। तदाहुः। आहुरति। अति वै। वा एताः।

एता वर्त्रम्। वर्त्रम् नेदन्ति। नेदन्त्यति। अति वाचम्। वाचम् मनः। मनो वाव। वावैताः। एता न। नाति। अति नेदन्ति। नेदन्तीति। इति मनसा। मनसा प्र। प्र णयति। नयतीयम्। इयँव्वै। वै मनः। मनोऽनया। ॥ [२५] ॥ अनयैव। एवैनाः। एनाः प्र। प्र णयति। नयत्यस्कन्नहविः। अस्कन्नहविर् भवति। अस्कन्नहविरित्यस्कन्न—हविः। भवति यः। य एवम्। एवँव्वेद। वेद यज्ञायुधानि। यज्ञायुधानि सम्। यज्ञायुधानीति यज्ञ—आयुधानि। सम् भरति। भरति यज्ञः। यज्ञो वै। वै यज्ञायुधानि। यज्ञायुधानि यज्ञम्। यज्ञायुधानीति यज्ञ—आयुधानि। यज्ञमेव। एव तत्। तथ् सम्। सम् भरति। भरति यत्। यदेकमेकम्। एकमेकꣳ सम्भरेत्। एकमेकमित्येकं—एकम्। सम्भरेत्,पितृदेवत्यानि। सम्भरेदिति सं—भरेत्। पितृदेवत्यानि स्युः। पितृदेवत्यानीति पितृ—देवत्यानि। स्युर् यत्। यथ् सह। सह सर्वाणि। सर्वाणि मानुषाणि। मानुषाणि द्वेद्वे। द्वेद्वे सम्। द्वेद्वे इति द्वे—द्वे। सम् भरति। भरति याज्यानुवाक्ययोः। याज्यानुवाक्ययोरेव। याज्यानुवाक्ययोरिति याज्या—अनुवाक्ययोः। एव रूपम्। रूपम् करोति। करोत्यथो। अथो मिथुनम्। अथो इत्यथो। मिथुनमेव। एव यः। यो वै। वै दश। दश यज्ञायुधानि। यज्ञायुधानि वेद। यज्ञायुधानीति यज्ञ—आयुधानि। वेद मुखतः। मुखतोऽस्य। अस्य यज्ञः। यज्ञः कल्पते। कल्पते स्फ्यः। स्फ्यश्च। ॥ [२६] ॥ च कपालानि। कपालानि च। चाग्निहोत्रहवणी। अग्निहोत्रहवणी च। अग्निहोत्रहवणीत्यग्निहोत्र—हवनी। च शूर्पम्। शूर्पम् च। च कृष्णाजिनम्। कृष्णाजिनम् च। कृष्णाजिनमिति कृष्ण—अजिनम्। च शम्या। शम्या च। चोलूखलम्। उलूखलम् च। च मुसलम्। मुसलम् च। च दृषत्। दृषच्च। चोपला। उपला च। चैतानि। एतानि वै। वै दश। दश,यज्ञायुधानि। यज्ञायुधानि यः। यज्ञायुधानीति यज्ञ—आयुधानि। य एवम्। एवँव्वेद। वेद मुखतः। मुखतोऽस्य। अस्य यज्ञः। यज्ञः कल्पते। कल्पते यः। यो वै। वै देवेभ्यः। देवेभ्यः प्रतिप्रोच्य। प्रतिप्रोच्य यज्ञेन। प्रतिप्रोच्येति प्रति—प्रोच्य। यज्ञेन यजते। यजते जुषन्ते। जुषन्तेऽस्य। अस्य देवाः। देवा हव्यम्। हव्यꣳ हविः। हविर्,निरुप्यमाणम्। निरुप्यमाणमभि। निरुप्यमाणमिति निः—उप्यमानम्। अभि मन्त्रयेत। मन्त्रयेताग्निम्। अग्निꣳ होतारम्। होतारमिह। इह तम्। तꣳ हुवे। हुव इति। इति देवेभ्यः। ॥ [२७] ॥ देवेभ्य एव। एव प्रतिप्रोच्य। प्रतिप्रोच्य यज्ञेन। प्रतिप्रोच्येति प्रति—प्रोच्य। यज्ञेन यजते। यजते जुषन्ते। जुषन्तेऽस्य। अस्य

देवाः। देवा हव्यम्। हव्यमेषः। एष वै। वै यज्ञस्य। यज्ञस्य ग्रहः। ग्रहो गृहीत्वा। गृहीत्वैव। एव यज्ञेन। यज्ञेन यजते। यजते तत्। तदुदित्वा। उदित्वा वाचम्। वाचँय्यच्छति। यच्छति यज्ञस्य। यज्ञस्य धृत्यै। धृत्या अथो। अथो मनसा। अथो इत्यथो। मनसा वै। वै प्रजापतिः। प्रजापतिर् यज्ञम्। प्रजापतिरिति प्रजा—पतिः। यज्ञमतनुत। अतनुत मनसा। मनसैव। एव तत्। तद् यज्ञम्। यज्ञम् तनुते। तनुते रख्षसाम्। रख्षसामनन्ववचाराय। अनन्ववचाराय यः। अनन्ववचारायेत्यननु—अवचाराय। यो वै। वै यज्ञम्। यज्ञँय्योगे। योग आगते। आगते युनक्ति। आगत इत्या—गते। युनक्ति युङ्क्ते। युङ्क्ते युञ्जानेषु। युञ्जानेषु कः। कस्त्वा। त्वा युनक्ति। युनक्ति सः। स त्वा। त्वा युनक्तु। युनक्त्विति। इत्याह। आह प्रजापतिः। प्रजापतिर्,वै। प्रजापतिरिति प्रजा—पतिः। वै कः। कः प्रजापतिना। प्रजापतिनैव। प्रजापतिनेति प्रजा—पतिना। एवैनम्। एनँय्युनक्ति। युनक्ति युङ्क्ते। युङ्क्ते युञ्जानेषु। युञ्जानेष्विति युञ्जानेषु॥ ॥ [२८] ॥

(वैमनःस्यैतियुनक्त्वेकादश च) ॥ ८ ॥

प्रजापतिर्,यज्ञान्। प्रजापतिरिति प्रजा—पतिः। यज्ञानसृजत। असृजताग्निहोत्रम्। अग्निहोत्रम् च। अग्निहोत्रमित्यग्नि—होत्रम्। चाग्निष्टोमम्। अग्निष्टोमम् च। अग्निष्टोममित्यग्नि—स्तोमम्। च पौर्णमासीम्। पौर्णमासीम् च। पौर्णमासीमिति पौर्ण—मासीम्। चोक्थ्यम्। उक्थ्यम् च। चामावास्याम्। अमावास्याम् च। अमावास्यामित्यमा—वास्याम्। चातिरात्रम्। अतिरात्रम् च। अतिरात्रमित्यति—रात्रम्। च तान्। तानुत्। उदमिमीत। अमिमीत यावत्। यावदग्निहोत्रम्। अग्निहोत्रमासीत्। अग्निहोत्रमित्यग्नि—होत्रम्। आसीत् तावान्। तावानग्निष्टोमः। अग्निष्टोमो यावती। अग्निष्टोम इत्यग्नि—स्तोमः। यावती पौर्णमासी। पौर्णमासी तावान्। पौर्णमासीति पौर्ण—मासी। तावानुक्थ्यः। उक्थ्यो यावती। यावत्यमावास्या। अमावास्या तावान्। अमावास्येत्यमा—वास्या। तावानतिरात्रः। अतिरात्रो यः। अतिरात्र इत्यति—रात्रः। य एवम्। एवव्विद्वान्। विद्वानग्निहोत्रम्। अग्निहोत्रम् जुहोति। अग्निहोत्रमित्यग्नि—होत्रम्। जुहोति यावत्। यावदग्निष्टोमेन। अग्निष्टोमेनोपाप्नोति। अग्निष्टोमेनेत्यग्नि—

स्तोमेन। उपाप्नोति तावत्। उपाप्नोतीत्युप—आप्नोति। तावदुप। उपाप्नोति। आप्नोति यः। य एवम्। एवँविद्वान्। विद्वान्,पौर्णमासीम्। पौर्णमासीँय्यजते। पौर्णमासीमिति पौर्ण—मासीम्। यजते यावत्। यावदुक्थ्येन। उक्थ्येनोपाप्नोति। उपाप्नोति तावत्। उपाप्नोतीत्युप—आप्नोति। ॥ [२९] ॥ तावदुप। उपाप्नोति। आप्नोति यः। य एवम्। एवँविद्वान्। विद्वानमावास्याम्। अमावास्याँय्यजते। अमावास्यामित्यमा—वास्याम्। यजते यावत्। यावदतिरात्रेण। अतिरात्रेणोपाप्नोति। अतिरात्रेणेत्यति—रात्रेण। उपाप्नोति तावत्। उपाप्नोतीत्युप—आप्नोति। तावदुप। उपाप्नोति। आप्नोति परमेष्ठिनः। परमेष्ठिनो वै। वा एषः। एष यज्ञः। यज्ञोऽग्रे। अग्र आसीत्। आसीत्,तेन। तेन सः। स परमाम्। परमाम् काष्ठाम्। काष्ठामगच्छत्। अगच्छत् तेन। तेन प्रजापतिम्। प्रजापतिम् निरवासाययत्। प्रजापतिमिति प्रजा—पतिम्। निरवासाययत्,तेन। निरवासाययदिति निः—अवासाययत्। तेन प्रजापतिः। प्रजापतिः परमाम्। प्रजापतिरिति प्रजा—पतिः। परमाम् काष्ठाम्। काष्ठामगच्छत्। अगच्छत् तेन। तेनेन्द्रम्। इन्द्रम् निरवासाययत्। निरवासाययत्,तेन। निरवासाययदिति निः—अवासाययत्। तेनेन्द्रः। इन्द्रः परमाम्। परमाम् काष्ठाम्। काष्ठामगच्छत्। अगच्छत्,तेन। तेनाग्नीषोमौ। अग्नीषोमौ निरवासाययत्। अग्नीषोमावित्यग्नी—सोमौ। निरवासाययत्,तेन। निरवासाययदिति निः—अवासाययत्। तेनाग्नीषोमौ। अग्नीषोमौ परमाम्। अग्नीषोमावित्यग्नी—सोमौ। परमाम् काष्ठाम्। काष्ठामगच्छताम्। अगच्छताँय्यः। य एवम्। ॥ [३०] ॥ एवँविद्वान्। विद्वान्,दर्शपूर्णमासौ। दर्शपूर्णमासौ यजते। दर्शपूर्णमासाविति दर्श—पूर्णमासौ। यजते परमाम्। परमामेव। एव काष्ठाम्। काष्ठाम् गच्छति। गच्छति यः। यो वै। वै प्रजातेन। प्रजातेन यज्ञेन। प्रजातेनेति प्र—जातेन। यज्ञेन यजते। यजते प्र। प्र प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिर् मिथुनैः। पशुभिरिति पशु—भिः। मिथुनैर् जायते। जायते द्वादश। द्वादश मासाः। मासाः सँव्वथ्सरः। सँव्वथ्सरो द्वादश। सँव्वथ्सर इति सं—वथ्सरः। द्वादश द्वन्द्वानि। द्वन्द्वानि दर्शपूर्णमासयोः। द्वन्द्वानीति द्वम्—द्वानि। दर्शपूर्णमासयोस्तानि। दर्शपूर्णमासयोरिति दर्श—पूर्णमासयोः। तानि सम्पाद्यानि। सम्पाद्यानीति। सम्पाद्यानीति सम्—पाद्यानि। इत्याहुः। आहुर्,वथ्सम्। वथ्सम् च। चोपावसृजति। उपावसृजत्युखाम्। उपावसृजतीत्युप—

अवसृजति। उखाम् च। चाधि। अधि श्रयति। श्रयत्यव। अव च। च हन्ति। हन्ति दृषदौ। दृषदौ च। च समाहन्ति। समाहन्त्यधि। समाहन्तीति सम्—आहन्ति। अधि च। च वपते। वपते कपालानि। कपालानि च। चोप। उप दधाति। दधाति पुरोडाशम्। पुरोडाशम् च। चाधिश्रयति। ॥ [३१] ॥ अधिश्रयत्याज्यम्। अधिश्रयतीत्यधि—श्रयति। आज्यम् च। च स्तम्बयजुः। स्तम्बयजुश्च। स्तम्बयजुरिति स्तम्ब—यजुः। च हरति। हरत्यभि। अभि च। च गृह्णाति। गृह्णाति वेदिम्। वेदिम् च। च परिगृह्णाति। परिगृह्णाति पत्नीम्। परिगृह्णातीति परि—गृह्णाति। पत्नीम् च। च सम्। सम् नह्यति। नह्यति प्रोक्षणीः। प्रोक्षणीश्च। प्रोक्षणीरिति प्र—उक्षणीः। चासादयति। आसादयत्याज्यम्। आसादयतीत्या—सादयति। आज्यम् च। चैतानि। एतानि वै। वै द्वादश। द्वादश द्वन्द्वानि। द्वन्द्वानि दर्शपूर्णमासयोः। द्वन्द्वानीति द्वम्—द्वानि। दर्शपूर्णमासयोस्तानि। दर्शपूर्णमासयोरिति दर्श—पूर्णमासयोः। तानि यः। य एवम्। एवꣳ सम्पाद्य। सम्पाद्य यजते। सम्पाद्येति सम्—पाद्य। यजते प्रजातेन। प्रजातेनैव। प्रजातेनेति प्र—जातेन। एव यज्ञेन। यज्ञेन यजते। यजते प्र। प्र प्रजया। प्रजया पशुभिः। प्रजयेति प्र—जया। पशुभिर् मिथुनैः। पशुभिरिति पशु—भिः। मिथुनैर्,जायते। जायत इति जायते॥ ॥ [३२] ॥

(उक्थ्येनोपाप्नोत्यगच्छताय्ँयः पुरोडाशंचत्वारिꣳशच्च) ॥ ९ ॥

---

ध्रुवोऽसि। असि ध्रुवः। ध्रुवोऽहम्। अहꣳ सजातेषु। सजातेषु भूयासम्। सजातेष्विति स—जातेषु। भूयासमिति। इत्याह। आह ध्रुवान्। ध्रुवानेव। एवैनान्। एनान् कुरुते। कुरुत उग्रः। उग्रोऽसि। अस्युग्रः। उग्रोऽहम्। अहꣳ सजातेषु। सजातेषु भूयासम्। सजातेष्विति स—जातेषु। भूयासमिति। इत्याह। आहाप्रतिवादिनः। अप्रतिवादिन एव। अप्रतिवादिन इत्य-प्रति—वादिनः। एवैनान्। एनान् कुरुते। कुरुतेऽभिभूः। अभिभूरसि। अभिभूरित्यभि—भूः। अस्यभिभूः। अभिभूरहम्। अभिभूरित्यभि—भूः। अहꣳ सजातेषु। सजातेषु भूयासम्। सजा-तेष्विति स—जातेषु। भूयासमिति। इत्याह। आह यः। य एव। एवैनम्। एनम् प्रत्युत्पि-पीते। प्रत्युत्पिपीते तम्। प्रत्युत्पिपीत इति प्रति—उत्पिपीते। तमुप। उपास्यते। अस्यते

युनज्मि। युनज्मि त्वा। त्वा ब्रह्मणा। ब्रह्मणा दैव्येन। दैव्येनेति। इत्याह। आहैषः। एष वै। वा अग्नेः। अग्नेर्योगः। योगस्तेन। तेनैव। ॥ [३३] ॥ एवैनम्। एनय्ँयुनक्ति। युनक्ति यज्ञस्य। यज्ञस्य वै। वै समृद्धेन। समृद्धेन देवाः। समृद्धेनेति सं—ऋद्धेन। देवाः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमायन्न्। आयन्यज्ञस्य। यज्ञस्य व्यृद्धेन। व्यृद्धेनासुरान्। व्यृद्धेनेति वि—ऋद्धेन। असुरान् परा। परा ऽभावयन्न्। अभावयन्यत्। यन्मे। मे अग्ने। अग्ने अस्य। अस्य यज्ञस्य। यज्ञस्य रिष्यात्। रिष्यादिति। इत्याह। आह यज्ञस्य। यज्ञस्यैव। एव तत्। तथ् समृद्धेन। समृद्धेन यजमानः। समृद्धेनेति सम्—ऋद्धेन। यजमानः सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमेति। एति यज्ञस्य। यज्ञस्य व्यृद्धेन। व्यृद्धेन भ्रातृव्यान्। व्यृद्धेनेति वि—ऋद्धेन। भ्रातृव्यान् परा। परा भावयति। भावयत्यग्निहोत्रम्। अग्निहोत्रमेताभिः। अग्निहोत्रमित्यग्नि—होत्रम्। एताभिर्व्याहृतीभिः। व्याहृतीभिरुप। व्याहृतीभिरिति व्याहृति—भिः। उप सादयेत्। सादयेद्यज्ञमुखम्। यज्ञमुखव्वै। यज्ञमुखमिति यज्ञ—मुखम्। वा अग्निहोत्रम्। अग्निहोत्रम् ब्रह्म। अग्निहोत्रमित्यग्नि—होत्रम्। ब्रह्मैताः। एता व्याहृतयः। व्याहृतयो यज्ञमुखे। व्याहृतय इति वि—आहृतयः। यज्ञमुख एव। यज्ञमुख इति यज्ञ—मुखे। एव ब्रह्म। ब्रह्म कुरुते। ॥ [३४] ॥ कुरुते सव्ँवथ्सरे। सव्ँवथ्सरे पर्यागते। सव्ँवथ्सर इति सं—वथ्सरे। पर्यागत एताभिः। पर्यागत इति परि—आगते। एताभिरेव। एवोप। उप सादयेत्। सादयेद् ब्रह्मणा। ब्रह्मणैव। एवोभयतः। उभयतः सव्ँवथ्सरम्। सव्ँवथ्सरम् परि। सव्ँवथ्सरमिति सं—वथ्सरम्। परि गृह्णाति। गृह्णाति दर्शपूर्णमासौ। दर्शपूर्णमासौ चातुर्मास्यानि। दर्शपूर्णमासाविति दर्श—पूर्णमासौ। चातुर्मास्यान्यालभमानः। चातुर्मास्यानीति चातुः—मास्यानि। आलभमान एताभिः। आलभमान इत्या—लभमानः। एताभिर् व्याहृतीभिः। व्याहृतीभिर्हवीꣳषि। व्याहृतीभिरिति व्याहृति—भिः। हवीꣳष्या। आ सादयेत्। सादयेद् यज्ञमुखम्। यज्ञमुखव्वै। यज्ञमुखमिति यज्ञ—मुखम्। वै दर्शपूर्णमासौ। दर्शपूर्णमासौ चातुर्मास्यानि। दर्शपूर्णमासाविति दर्श—पूर्णमासौ। चातुर्मास्यानि ब्रह्म। चातुर्मास्यानीति चातुः—मास्यानि। ब्रह्मैताः। एता व्याहृतयः। व्याहृतयो यज्ञमुखे। व्याहृतय इति वि—आहृतयः। यज्ञमुख एव। यज्ञमुख इति यज्ञ—मुखे। एव ब्रह्म। ब्रह्म कुरुते।

कुरुते संवँथ्सरे। संवँथ्सरे पर्यागते। संवँथ्सर इति सम्—वथ्सरे। पर्यागत एताभिः। पर्या-गत इति परि—आगते। एताभिरेव। एवा। आ सादयेत्। सादयेद् ब्रह्मणा। ब्रह्मणैव। एवोभ-यतः। उभयतः संवँथ्सरम्। संवँथ्सरम् परि। संवँथ्सरमिति सम्—वथ्सरम्। परि गृह्णाति। गृह्णाति यत्। यद् वै। वै यज्ञस्य। यज्ञस्य साम्ना। साम्ना क्रियते। क्रियते राष्ट्रम्। राष्ट्र-य्ँयज्ञस्य। ॥ [३५] ॥ यज्ञस्याशीः। आशीर्,गच्छति। आशीरित्या—शीः। गच्छति यत्। यदृचा। ऋचा विशम्। विशय्ँयज्ञस्य। यज्ञस्याशीः। आशीर्,गच्छति। आशीरित्या—शीः। गच्छत्यथ। अथ ब्राह्मणः। ब्राह्मणो ऽनाशीर्केण। अनाशीर्केण यज्ञेन। यज्ञेन यजते। यजते सामिधेनीः। सामिधेनीरनुवख्यन्न्। सामिधेनीरिति साम्—इधेनीः। अनुवख्यन्नेताः। अनु-वख्यन्नित्यनु—वख्यन्न्। एता व्याहृतीः। व्याहृतीः पुरस्तात्। व्याहृतीरिति वि—आहृतीः। पुरस्ताद् दद्ध्यात्। दद्ध्याद्,ब्रह्म। ब्रह्मैव। एव प्रतिपदम्। प्रतिपदम् कुरुते। प्रतिपदमिति प्रति—पदम्। कुरुते तथा। तथा ब्राह्मणः। ब्राह्मणः साशीर्केण। साशीर्केण यज्ञेन। साशी-र्केणेति स—आशीर्केण। यज्ञेन यजते। यजते यम्। यम् कामयेत। कामयेत यजमानम्। यज-मानम् भ्रातृव्यम्। भ्रातृव्यमस्य। अस्य यज्ञस्य। यज्ञस्याशीः। आशीर् गच्छेत्। आशीरित्या—शीः। गच्छेदिति। इति तस्य। तस्यैताः। एता व्याहृतीः। व्याहृतीः पुरोनुवाक्यायाम्। व्याहृ-तीरिति वि—आहृतीः। पुरोनुवाक्यायाम् दध्यात्। पुरोनुवाक्यायामिति पुरः—अनुवाक्यायाम्। दध्याद् भ्रातृव्यदेवत्या। भ्रातृव्यदेवत्या वै। भ्रातृव्यदेवत्येति भ्रातृव्य—देवत्या। वै पुरोनु-वाक्या। पुरोनुवाक्या भ्रातृव्यम्। पुरोनुवाक्येति पुरः—अनुवाक्या। भ्रातृव्यमेव। एवास्य। अस्य यज्ञस्य। यज्ञस्याशीः। ॥ [३६] ॥ आशीर्,गच्छति। आशीरित्या—शीः। गच्छति यान्। यान् कामयेत। कामयेत यजमानान्। यजमानान्थ् समावती। समावत्येनान्। एनान्यज्ञस्य। यज्ञस्याशीः। आशीर्,गच्छेत्। आशीरित्या—शीः। गच्छेदिति। इति तेषाम्। तेषामेताः। एता व्याहृतीः। व्याहृतीः पुरोनुवाक्यायाः। व्याहृतीरिति वि—आहृतीः। पुरोनुवाक्याया अर्द्धर्चे। पुरोनुवाक्याया इति पुरः—अनुवाक्यायाः। अर्द्धर्च एकाम्। अर्द्धर्च इत्यर्द्ध—ऋचे। एकाम् दद्ध्यात्। दद्ध्याद् याज्यायै। याज्यायै पुरस्तात्। पुरस्तादेकाम्। एकाय्ँयाज्यायाः। याज्याया अर्द्धर्चे। अर्द्धर्च एकाम्। अर्द्धर्च इत्यर्द्ध—ऋचे। एकाम् तथा। तथैनान्। एनान्थ् समावती।

समावती यज्ञस्य। यज्ञस्याशीः। आशीर्गच्छति। आशीरित्या—शीः। गच्छति यथा। यथा वै। वै पर्जन्यः। पर्जन्यः सुवृष्टम्। सुवृष्टँव्वर्षति। सुवृष्टमिति सु—वृष्टम्। वर्षत्येवम्। एवँय्यज्ञः। यज्ञो यजमानाय। यजमानाय वर्षति। वर्षति स्थलया। स्थलयोदकम्। उदकम् परिगृह्णन्ति। परिगृह्णन्त्याशिषा। परिगृह्णन्तीति परि—गृह्णन्ति। आशिषा यज्ञम्। आशिषेत्या—शिषा। यज्ञँय्यजमानः। यजमानः परि। परि गृह्णाति। गृह्णाति मनः। मनोऽसि। असि प्राजापत्यम्। प्राजापत्यम् मनसा। प्राजापत्यमिति प्राजा—पत्यम्। ॥ [३७] ॥ मनसा मा। मा भूतेन। भूतेना। आ विश। विशेति। इत्याह। आह मनः। मनो वै। वै प्राजापत्यम्। प्राजापत्यम् प्राजापत्यः। प्राजापत्यमिति प्राजा—पत्यम्। प्राजापत्यो यज्ञः। प्राजापत्य इति प्राजा—पत्यः। यज्ञो मनः। मन एव। एव यज्ञम्। यज्ञमात्मन्न्। आत्मन् धत्ते। धत्ते वाक्। वागसि। अस्यैन्द्री। ऐन्द्री सपत्नक्षयणी। सपत्नक्षयणी वाचा। सपत्नक्षयणीति सपत्न—क्षयणी। वाचा मा। मेन्द्रियेण। इन्द्रियेणा। आ विश। विशेति। इत्याह। आहैन्द्री। ऐन्द्री वै। वै वाक्। वाग् वाचम्। वाचमेव। एवैन्द्रीम्। ऐन्द्रीमात्मन्न्। आत्मन् धत्ते। धत्त इति धत्ते॥ ॥ [३८] ॥

(तेनैव ब्रह्म राष्ट्रमेवास्य यज्ञस्यप्राजापत्यंषड्विंशच्च) ॥ १० ॥

यो वै। वै सप्तदशम्। सप्तदशम् प्रजापतिम्। सप्तदशमिति सप्त—दशम्। प्रजापतिँय्यज्ञम्। प्रजापतिमिति प्रजा—पतिम्। यज्ञमन्वायत्तम्। अन्वायत्तव्वेद। अन्वायत्तमित्यनु—आयत्तम्। वेद प्रति। प्रति यज्ञेन। यज्ञेन तिष्ठति। तिष्ठति न। न यज्ञात्। यज्ञाद् भ्रंशते। भ्रंशत आ। आ श्रावय। श्रावयेति। इति चतुरक्षरम्। चतुरक्षरमस्तु। चतुरक्षरमिति चतुः—अक्षरम्। अस्तु श्रौषट्। श्रौषडिति। इति चतुरक्षरम्। चतुरक्षरँय्यज। चतुरक्षरमिति चतुः—अक्षरम्। यजेति। इति द्व्यक्षरम्। द्व्यक्षरँय्ये। द्व्यक्षरमिति द्वि—अक्षरम्। ये यजामहे। यजामह इति। इति पञ्चाक्षरम्। पञ्चाक्षरम् द्व्यक्षरः। पञ्चाक्षरमिति पञ्च—अक्षरम्। द्व्यक्षरो वषट्कारः। द्व्यक्षर इति द्वि—अक्षरः। वषट्कार एषः। वषट्कार इति वषट्—कारः। एष वै। वै सप्तदशः। सप्तदशः प्रजापतिः। सप्तदश इति सप्त—दशः। प्रजापतिर्यज्ञम्। प्रजापतिरिति प्रजा—पतिः। यज्ञमन्वायत्तः। अन्वायत्तो यः। अन्वायत्त

इत्यनु—आयत्तः। य एवम्। एवव्ँवेद। वेद प्रति। प्रति यज्ञेन। यज्ञेन तिष्ठति। तिष्ठति न। न यज्ञात्। यज्ञाद्भ्रꣳशते। भ्रꣳशते यः। यो वै। वै यज्ञस्य। यज्ञस्य प्रायणम्। प्रायणम्प्रतिष्ठाम्। प्रायणमिति प्र—अयनम्। प्रतिष्ठामुदयनम्। प्रतिष्ठामिति प्रति—स्थाम्। ॥ [३९] ॥ उदयनव्ँवेद। उदयनमित्युत्—अयनम्। वेद प्रतिष्ठितेन। प्रतिष्ठितेनारिष्टेन। प्रतिष्ठितेनेति प्रति—स्थितेन। अरिष्टेन यज्ञेन। यज्ञेन सꣳस्थाम्। सꣳस्थाम् गच्छति। सꣳस्थामिति सम्—स्थाम्। गच्छत्या। आ श्रावय। श्रावयास्तु। अस्तु श्रौषट्। श्रौषड् यज। यज ये। ये यजामहे। यजामहे वषट्कारः। वषट्कार एतत्। वषट्कार इति वषट्—कारः। एतद् वै। वै यज्ञस्य। यज्ञस्य प्रायणम्। प्रायणमेषा। प्रायणमिति प्र—अयनम्। एषा प्रतिष्ठा। प्रतिष्ठैतत्। प्रतिष्ठेति प्रति—स्था। एतदुदयनम्। उदयनय्ँयः। उदयनमित्युत्—अयनम्। य एवम्। एवव्ँवेद। वेद प्रतिष्ठितेन। प्रतिष्ठितेनारिष्टेन। प्रतिष्ठितेनेति प्रति—स्थितेन। अरिष्टेन यज्ञेन। यज्ञेन सꣳस्थाम्। सꣳस्थाम् गच्छति। सꣳस्थामिति सम्—स्थाम्। गच्छति यः। यो वै। वै सूनृतायै। सूनृतायै दोहम्। दोहव्ँवेद। वेद दुहे। दुह एव। एवैनाम्। एनाय्ँयज्ञः। यज्ञो वै। वै सूनृता। सूनृता। आ श्रावय। श्रावयेति। इत्या। ऐव। एवैनाम्। एनामह्वत्। अह्वदस्तु। अस्तु श्रौषट्। ॥ [४०] ॥ श्रौषडिति। इत्युपावास्राक्। उपावास्राग् यज। उपावास्रागित्युप—अवास्राक्। यजेति। इत्युत्। उदनैषीत्। अनैषीद् ये। ये यजामहे। यजामह इति। इत्युप। उपासदत्। असदद् वषट्कारेण। वषट्कारेण दोग्धि। वषट्कारेणेति वषट्—कारेण। दोग्ध्येषः। एष वै। वै सूनृतायै। सूनृतायै दोहः। दोहो यः। य एवम्। एवव्ँवेद। वेद दुहे। दुह एव। एवैनाम्। एनाम् देवाः। देवा वै। वै सत्रम्। सत्रमासत। आसत तेषाम्। तेषाम् दिशः। दिशोऽदस्यन्न्। अदस्यन् ते। त एताम्। एतामार्द्राम्। आर्द्राम् पङ्क्तिम्। पङ्क्तिमपश्यन्न्। अपश्यन्ना। आ श्रावय। श्रावयेति। इति पुरोवातम्। पुरोवातमजनयन्न्। पुरोवातमिति पुरः—वातम्। अजनयन्नस्तु। अस्तु श्रौषट्। श्रौषडिति। इत्यभ्रम्। अभ्रꣳ सम्। समप्लावयन्न्। अप्लावयन्यज। यजेति। इति विद्युतम्। विद्युतमजनयन्न्। विद्युतमिति वि—द्युतम्। ॥ [४१] ॥ अजनयन्ये। ये यजामहे। यजामह इति। इति प्र। प्रावर्षयन्न्। अवर्षयन्नभि। अभ्यस्तनयन्न्। अस्तनयन्वषट्कारेण। वषट्कारेण ततः। वषट्कारेणेति वषट्—कारेण। ततो वै। वै तेभ्यः। तेभ्यो दिशः। दिशः प्र। प्राप्या-

यन्त। अप्यायन्त यः। य एवम्। एवव्ँवेद। वेद प्र। प्रास्मै। अस्मै दिशः। दिशः प्यायन्ते। प्यायन्ते प्रजापतिम्। प्रजापतिम् त्वोवेद। प्रजापतिमिति प्रजा—पतिम्। त्वोवेद प्रजापतिः। त्वोवेदेति त्वः—वेद। प्रजापति,स्त्वव्ँवेद। प्रजापतिरिति प्रजा—पतिः। त्वव्ँवेद यम्। त्वव्ँवेदेति त्वम्—वेद। यम् प्रजापतिः। प्रजापतिर् वेद। प्रजापतिरिति प्रजा—पतिः। वेद सः। स पुण्यः। पुण्यो भवति। भवत्येषः। एष वै। वै छन्दस्यः। छन्दस्यः प्रजापतिः। प्रजापतिरा। प्रजापतिरिति प्रजा—पतिः। आ श्रावय। श्रावयास्तु। अस्तु श्रौषट्। श्रौषड् यज। यज ये। ये यजामहे। यजामहे वषट्कारः। वषट्कारो यः। वषट्कार इति वषट्—कारः। य एवम्। एवव्ँवेद। वेद पुण्यः। पुण्यो भवति। भवति वसन्तम्। वसन्तमृतूनाम्। ॥ [४२] ॥ ऋतूनाम् प्रीणामि। प्रीणामीति। इत्याह। आहर्तवः। ऋतवो वै। वै प्रयाजाः। प्रयाजा ऋतून्। प्रयाजा इति प्र—याजाः। ऋतूनेव। एव प्रीणाति। प्रीणाति ते। तेऽस्मै। अस्मै प्रीताः। प्रीता यथापूर्वम्। यथापूर्वम् कल्पन्ते। यथापूर्वमिति यथा—पूर्वम्। कल्पन्ते कल्पन्ते। कल्पन्तेऽस्मै। अस्मा ऋतवः। ऋतवो यः। य एवम्। एवव्ँवेद। वेदाग्नीषोमयोः। अग्नीषोमयोरहम्। अग्नीषोमयोरित्यग्नी—सोमयोः। अहम् देवयज्यया। देवयज्यया चक्षुष्मान्। देवयज्ययेति देव—यज्यया। चक्षुष्मान् भूयासम्। भूयासमिति। इत्याह। आहाग्नीषोमाभ्याम्। अग्नीषोमाभ्याव्ँवै। अग्नीषोमाभ्यामित्यग्नी—सोमाभ्याम्। वै यज्ञः। यज्ञ,श्चक्षुष्मान्। चक्षुष्मान् ताभ्याम्। ताभ्यामेव। एव चक्षुः। चक्षुरात्मन्न्। आत्मन् धत्ते। धत्तेऽग्नेः। अग्नेरहम्। अहम् देवयज्यया। देवयज्ययाऽन्नादः। देवयज्ययेति देव—यज्यया। अन्नादो भूयासम्। अन्नाद इत्यन्न—अदः। भूयासमिति। इत्याह। आहाग्निः। अग्निर्,वै। वै देवानाम्। देवानामन्नादः। अन्नादस्तेन। अन्नाद इत्यन्न—अदः। तेनैव। एवान्नाद्यम्। ॥ [४३] ॥ अन्नाद्यमात्मन्न्। अन्नाद्यमित्यन्न—अद्यम्। आत्मन,धत्ते। धत्ते दब्धिः। दब्धिरसि। अस्यदब्धः। अदब्धो भूयासम्। भूयासममुम्। अमुम् दभेयम्। दभेयमिति। इत्याह। आहैतया। एतया वै। वै दब्ध्या। दब्ध्या देवाः। देवा असुरान्। असुरानदभ्नुवन्न्। अदभ्नुवन,तया। तयैव। एव भ्रातृव्यम्। भ्रातृव्यम् दभ्नोति। दभ्नोत्यग्नीषोमयोः। अग्नीषोमयोरहम्। अग्नीषोमयोरित्यग्नी—सोमयोः। अहम् देवयज्यया। देवयज्यया वृत्रहा। देवयज्ययेति देव—यज्यया। वृत्रहा भूयासम्। वृत्रहेति वृत्र—हा। भूयास-

मिति। इत्याह। आहाग्नीषोमाभ्याम्। अग्नीषोमाभ्यांव्वै। अग्नीषोमाभ्यामित्यग्नी—सोमाभ्याम्। वा इन्द्रः। इन्द्रो वृत्रम्। वृत्रमहन्न्। अहन् ताभ्याम्। ताभ्यामेव। एव भ्रातृव्यम्। भ्रातृव्यङ्ग् स्तृणुते। स्तृणुत इन्द्राग्नियोः। इन्द्राग्नियोरहम्। इन्द्राग्नियोरितीन्द्र—अग्नियोः। अहम् देवयज्यया। देवयज्ययेन्द्रियावी। देवयज्ययेति देव—यज्यया। इन्द्रियाव्यन्नादः। अन्नादो भूयासम्। अन्नाद इत्यन्न—अदः। भूयासमिति। इत्याह। आहेन्द्रियावी। इन्द्रियाव्येव। एवान्नादः। अन्नादो भवति। अन्नाद इत्यन्न—अदः। भवतीन्द्रस्य। इन्द्रस्याहम्। ॥ [४४] ॥ अहम् देवयज्यया। देवयज्ययेन्द्रियावी। देवयज्ययेति देव—यज्यया। इन्द्रियावी भूयासम्। भूयासमिति। इत्याह। आहेन्द्रियावी। इन्द्रियाव्येव। एव भवति। भवति महेन्द्रस्य। महेन्द्रस्याहम्। महेन्द्रस्येति महा—इन्द्रस्य। अहम् देवयज्यया। देवयज्यया जेमानम्। देवयज्ययेति देव—यज्यया। जेमानम् महिमानम्। महिमानम् गमेयम्। गमेयमिति। इत्याह। आह जेमानम्। जेमानमेव। एव महिमानम्। महिमानम् गच्छति। गच्छत्यग्नेः। अग्नेः स्विष्टकृतः। स्विष्टकृतोऽहम्॥ स्विष्टकृत इति स्विष्ट—कृतः। अहम् देवयज्यया। देवयज्यया ऽऽयुष्मान्। देवयज्ययेति देव—यज्यया। आयुष्मान्यज्ञेन। यज्ञेन प्रतिष्ठाम्। प्रतिष्ठाम् गमेयम्। प्रतिष्ठामिति प्रति—स्थाम्। गमेयमिति। इत्याह। आहायुः। आयुरेव। एवात्मन्न्। आत्मन् धत्ते। धत्ते प्रति। प्रति यज्ञेन। यज्ञेन तिष्ठति। तिष्ठतीति तिष्ठति॥ ॥ [४५] ॥

(प्रतिष्ठामह्वदस्तुविद्युतंवसन्तंतेनैवेन्द्रस्याऽष्टात्रिंशच्च) ॥ ११ ॥

इन्द्रंव्वः। वो विश्वतः। विश्वतस्परि। परि हवामहे। हवामहे जनेभ्यः। जनेभ्य इति जनेभ्यः॥ अस्माकमस्तु। अस्तु केवलः। केवल इति केवलः॥ इन्द्रम् नरः। नरो नेमधिता। नेमधिता हवन्ते। नेमधितेति नेम—धिता। हवन्ते यत्। यत्,पार्याः। पार्या युनजते। युनजते धियः। धियस्ताः। ता इति ताः॥ शूरो नृषाता। नृषाता शवसः। नृषातेति नृ—साता। शवसश्चकानः। चकान आ। आ गोमति। गोमति व्रजे। गोमतीति गो—मति। व्रजे भज। भजा त्वम्। त्वम् नः। न इति नः॥ इन्द्रियाणि शतक्रतो। शतक्रतो या। शतक्रतो इति शत—क्रतो। या ते। ते जनेषु। जनेषु पञ्चसु। पञ्चस्विति पञ्च—सु॥ इन्द्र तानि। तानि ते। त आ। आ वृणे।

वृण इति वृणे॥ अनु ते। ते दायि। दायि महे। मह इन्द्रियाय। इन्द्रियाय सत्रा। सत्रा ते। ते विश्वम्। विश्वमनु। अनु वृत्रहत्ये। वृत्रहत्य इति वृत्र—हत्ये॥ अनु ख्षत्रम्। ॥ [४६] ॥ ख्षत्रमनु। अनु सहः। सहो यजत्र। यजत्रेन्द्र। इन्द्र देवेभिः। देवेभिरनु। अनु ते। ते नृषह्ये। नृषह्य इति नृ—सह्ये॥ आ यस्मिन्न्। यस्मिन्थ् सप्त। सप्त वासवाः। वासवास्तिष्ठन्ति। तिष्ठन्ति स्वारुहः। स्वारुहो यथा। स्वारुह इति स्व—रुहः। यथेति यथा॥ ऋषिर्ह। ह दीर्घश्रुत्तमः। दीर्घश्रुत्तम इन्द्रस्य। दीर्घश्रुत्तम इति दीर्घश्रुत्—तमः। इन्द्रस्य घर्मः। घर्मो अतिथिः। अतिथिरित्यतिथिः॥ आमासु पक्वम्। पक्वमैरयः। ऐरय आ। आ सूर्यम्। सूर्यꣳ रोहयः। रोहयो दिवि। दिवीति दिवि॥ घर्मम् न। न सामन्न्। सामन् तपत। तपता सुवृक्तिभिः। सुवृक्तिभिर् जुष्टम्। सुवृक्तिभिरिति सुवृक्ति—भिः। जुष्टम् गिर्वणसे। गिर्वणसे गिरः। गिर इति गिरः॥ इन्द्रमित्। इद् गाथिनः। गाथिनो बृहत्। बृहदिन्द्रम्। इन्द्रमर्केभिः। अर्केभिरर्किणः। अर्किण इत्यर्किणः॥ इन्द्रँव्वाणीः। वाणीरनूषत। अनूषतेत्यनूषत॥ गायन्ति त्वा। त्वा गायत्रिणः। गायत्रिणो ऽर्चन्ति। ॥ [४७] ॥ अर्चन्त्यर्कम्। अर्कमर्किणः। अर्किण इत्यर्किणः॥ ब्रह्माणस्त्वा। त्वा शतक्रतो। शतक्रत वुत्। शतक्रतविति शत—क्रतो। उद् वꣳशम्। वꣳशमिव। इव येमिरे। येमिर इति येमिरे॥ अꣳहोमुचे प्र। अꣳहोमुच इत्यꣳहः—मुचे। प्र भरेम। भरेमा मनीषाम्। मनीषामोषिष्ठदाव्न्ने। ओषिष्ठदाव्न्ने सुमतिम्। ओषिष्ठदाव्न्न इत्योषिष्ठ—दाव्न्ने। सुमतिं गृणानाः। सुमतिमिति सु—मतिम्। गृणाना इति गृणानाः। इदमिन्द्र। इन्द्र प्रति। प्रति हव्यम्। हव्यम् गृभाय। गृभाय सत्याः। सत्याः सन्तु। सन्तु यजमानस्य। यजमानस्य कामाः। कामा इति कामाः॥ विवेष यत्। यन्मा। मा धिषणा। धिषणा जजान। जजान स्तवै। स्तवै पुरा। पुरा पार्यात्। पार्यादिन्द्रम्। इन्द्रमह्नः। अह्न इत्यह्नः॥ अꣳहसो यत्र। यत्र पीपरत्। पीपरद् यथा। यथा नः। नो नावा। नावेव। इव यान्तम्। यान्तमुभये। उभये हवन्ते। हवन्त इति हवन्ते॥ प्र सम्राजम्। सम्राजम् प्रथमम्। सम्राजमिति सम्—राजम्। प्रथममद्ध्वराणाम्। अद्ध्वराणामꣳहोमुचम्। ॥ [४८] ॥ अꣳहोमुचँव्वृषभम्। अꣳहोमुचमित्यꣳहः—मुचम्। वृषभँय्यज्ञियानाम्। यज्ञियानामिति यज्ञियानाम्॥ अपाम् नपातम्। नपातमश्विना। अश्विना हयन्तम्। हयन्तमस्मिन्न्। अस्मिन्नरः। नर इन्द्रियम्। इन्द्रियम् धत्तम्। धत्तमोजः।

ओज इत्योजः॥ वि नः। न इन्द्र। इन्द्र मृधः। मृधो जहि। जहि नीचा। नीचा यच्छ। यच्छ पृतन्यतः। पृतन्यत इति पृतन्यतः॥ अधस्पदम् तम्। अधस्पदमित्यधः—पदम्। तमीम्। ईम् कृधि। कृधि यः। यो अस्मान्। अस्माꣳ अभिदासति। अभिदासतीत्यभि—दासति॥ इन्द्र ख्षत्रम्। ख्षत्रमभि। अभि वामम्। वाममोजः। ओजोऽजायथाः। अजायथा वृषभ। वृषभ चर्षणीनाम्। चर्षणीनामिति चर्षणीनाम्॥ अपानुदः। अनुदो जनम्। जनम,मित्रयन्तम्। अमित्रयन्तमुरुम्। अमित्रयन्तमित्यमित्र—यन्तम्। उरुम् देवेभ्यः। देवेभ्यो अकृणोः। अकृणोरु। उ लोकम्। लोकमिति लोकम्॥ मृगो न। न भीमः। भीमः कुचरः। कुचरो गिरिष्ठाः। गिरिष्ठाः परावतः। गिरिष्ठा इति गिरि—स्थाः। परावत आ। परावत इति परा—वतः। ॥ [४९] ॥ आ जगाम। जगामा परस्याः। परस्या इति परस्याः॥ सृकꣳ सꣳशाय। सꣳशाय पविम्। सꣳशायेति सम्—शाय। पविमिन्द्र। इन्द्र तिग्मम्। तिग्माँवि। वि शत्रून्। शत्रून् ताढि। ताढि वि। वि मृधः। मृधो नुदस्व। नुदस्वेति नुदस्व॥ वि शत्रून्। शत्रूनवि। वि मृधः। मृधो नुद। नुद वि। वि वृत्रस्य। वृत्रस्य हनू। हनू रुज। हनू इति हनू। रुजेति रुज॥ वि मन्युम्। मन्युमिन्द्र। इन्द्र भामितः। भामितोऽमित्रस्य। अमित्रस्याभिदासतः। अभिदासत इत्यभि—दासतः॥ त्रातारमिन्द्रम्। इन्द्रमवितारम्। अवितारमिन्द्रम्। इन्द्रꣳ हवेहवे। हवेहवे सुहवम्। हवेहव इति हवे—हवे। सुहवꣳ शूरम्। सुहवमिति सु—हवम्। शूरमिन्द्रम्। इन्द्रमितीन्द्रम्॥ हुवे नु। नु शक्रम्। शक्रम् पुरुहूतम्। पुरुहूतमिन्द्रम्। पुरुहूतमिति पुरु—हूतम्। इन्द्रꣴ स्वस्ति। स्वस्ति नः। नो मघवा। मघवा धातु। मघवेति मघ—वा। धात्विन्द्रः। इन्द्र इतीन्द्रः॥ मा ते। ते अस्याम्। अस्याꣳ सहसावन्न्। ॥ [५०] ॥ सहसावन,परिष्टौ। सहसावन्निति सहसा—वन्न्। परिष्टावघाय। अघाय भूम। भूम हरिवः। हरिवः परादै। हरिव इति हरि—वः। परादा इति परा—दै॥ त्रायस्व नः। नो ऽवृकेभिः। अवृकेभिर् वरूथैः। वरूथैस्तव। तव प्रियासः। प्रियासः सूरिषु। सूरिषु स्याम। स्यामेति स्याम॥ अनवस्ते। ते रथम्। रथमश्वाय। अश्वाय तख्षन्न्। तख्षन् त्वष्टा। त्वष्टा वज्रम्। वज्रम् पुरुहूत। पुरुहूत द्युमन्तम्। पुरुहूतेति पुरु—हूत। द्युमन्तमिति द्यु—मन्तम्॥ ब्रह्माण इन्द्रम्। इन्द्रम् महयन्तः। महयन्तो अर्कैः। अर्कैरवर्द्धयन्न्। अवर्द्धयन्नहये। अहये हन्तवै। हन्तवा उ। उवित्यु॥ वृष्णे यत्। यत् ते। ते वृषणः। वृषणो अर्कम्।

अ॒र्कमर्चा॑न्। अर्चा॒निन्द्र॑। इन्द्र॒ ग्रावा॑णः। ग्रावा॑णो॒ अदि॑तिः। अदि॑तिः स॒जोषाः᳚। स॒जोषा॒ इति॑ स—जोषाः᳚॥ अ॒न॒श्वासो॒ ये। ये प॒वय॑ः। प॒वयो॑ऽर॒थाः। अ॒र॒था इन्द्रे॑षिताः। इन्द्रे॑षिता अ॒भ्यव॑र्तन्त। इन्द्रे॑षिता॒ इतीन्द्र॑—इ॒षि॒ता॒ः। अ॒भ्यव॑र्तन्त॒ दस्यू॑न्न्। अ॒भ्यव॑र्त॒न्तेत्य॑भि—अव॑र्तन्त। दस्यू॒निति॒ दस्यू॑न्न्॥ ॥ [५१] ॥

(वृ॒त्र॒हत्येऽनु॑गा॒यत्रि॒णोँऽध्व॒राणा᳚म्पर॒ाव॒तो॒ऽस्याम॒ष्टाच॑त्वारिꣳशच्च) ॥ १२ ॥

॥ हरिः ॐ ॥

प्रथमकाण्डे षष्ठः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १२ | ५१ |

ॐ